# Sri Narasimha Kavacham Lyrics

## हिंदी

नृसिंहकवचं वक्ष्ये प्रह्लादेनोदितं पुरा
सर्वरक्षाकरं पुण्यं सर्वोपद्रवनाशनम्
सर्व सम्पत्करं चैव स्वर्गमोक्षप्रदायकम्
ध्यात्वा नृसिंहं देवेशं हेमसिंहासनस्थितम्

विवृतास्यं त्रिनयनं शरदिन्दुसमप्रभम्
लक्ष्म्यालिङ्गितवामाङ्गं विभूतिभिरुपाश्रितम्
चतुर्भुजं कोमलाङ्गं स्वर्णकुण्डलशोभितम्
सरोजशोभितोरस्कं रत्नकेयूरमुद्रितम्

तप्तकाञ्चनसंकाशं पीतनिर्मलवाससम्
इन्द्रादिसुरमौलिस्थस्फुरन्माणिक्यदीप्तिभिः
विराजितपदद्वन्द्वं शङ्खचक्रादि हेतिभिः
गरुत्मता च विनयात् स्तूयमानं मुदान्वितम्

स्वहृत्कमलसंवासं कृत्वा तु कवचं पठेत्
नृसिंहो मे शिरः पातु लोकरक्षार्थसम्भवः
सर्वगोऽपि स्तम्भवासः फालं मे रक्षतु ध्वनिम्
नृसिंहो मे दृशौ पातु सोमसूर्याग्निलोचनः

स्मृतिं मे पातु नृहरिर्मुनिवर्यस्तुतिप्रियः
नासं मे सिंहनासस्तु मुखं लक्ष्मीमुखप्रियः
सर्वविद्याधिपः पातु नृसिंहो रसनां मम
वक्त्रं पात्विन्दुवदनं सदा प्रह्लादवन्दितः

नृसिंहः पातु मे कण्ठं स्कन्धौ भूभरान्तकृत्
दिव्यास्त्रशोभितभुजो नृसिंहः पातु मे भुजौ
लिरिक्सबोगी.कॉम
करौ मे देववरदो नृसिंहः पातु सर्वतः
हृदयं योगिसाध्यश्च निवासं पातु मे हरिः
मध्यं पातु हिरण्याक्षवक्षःकुक्षिविदारणः
नाभिं मे पातु नृहरिः स्वनाभि ब्रह्मसंस्तुतः

ब्रह्माण्डकोटयः कट्यां यस्यासौ पातु मे कटिम्
गुह्यं मे पातु गुह्यानां मन्त्राणां गुह्यरूपदृक्

ऊरू मनोभवः पातु जानुनी नररूपधृक्
जङ्घे पातु धराभारहर्ता योऽसौ नृकेसरी
सुरराज्यप्रदः पातु पादौ मे नृहरीश्वरः
सहस्रशीर्षा पुरुषः पातु मे सर्वशस्तनुम्

महोग्रः पूर्वतः पातु महावीराग्रजोऽग्नितः
महाविष्णुर्दक्षिणे तु महाज्वालस्तु नैरृतौ
पश्चिमे पातु सर्वेशो दिशि मे सर्वतोमुखः
नृसिंहः पातु वायव्यां सौम्यां भूषणविग्रहः

ईशान्यां पातु भद्रो मे सर्वमङ्गलदायकः
संसारभयतः पातु मृत्योर्मृत्युर्नृकेसरी
इदं नृसिंहकवचं प्रह्लादमुखमण्डितम्
भक्तिमान् यः पठेन्नित्यं सर्वपापैः प्रमुच्यते
इदं नृसिंहकवचं प्रह्लादमुखमण्डितम्
भक्तिमान् यः पठेन्नित्यं सर्वपापैः प्रमुच्यते

पुत्रवान् धनवान् लोके दीर्घायुरुपजायते
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयम्
पुत्रवान् धनवान् लोके दीर्घायुरुपजायते
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयम्
सर्वत्र जयमाप्नोति सर्वत्र विजयी भवेत्
भूम्यन्तरीक्षदिव्यानां ग्रहाणां विनिवारणम्

वृश्चिकोरगसम्भूत विषापहरणं परम्
ब्रह्मराक्षसयक्षाणां दूरोत्सारणकारणम्
भूर्जे वा तालपात्रे वा कवचं लिखितं शुभम्
करमूले धृतं येन सिध्येयुः कर्मसिद्धयः

देवासुरमनुष्येषु स्वं स्वमेव जयं लभेत्
एकसन्ध्यं त्रिसन्ध्यं वा यः पठेन्नियतो नरः
सर्वमङ्गलमाङ्गल्यं भुक्तिं मुक्तिं च विन्दति
द्वात्रिंशतिसहस्राणि पठेत् शुद्धात्मनां नृभिह

सर्वमङ्गलमाङ्गल्यं भुक्तिं मुक्तिं च विन्दति
द्वात्रिंशतिसहस्राणि पठेत् शुद्धात्मनां नृभिह

कवचस्यास्य मन्त्रस्य मन्त्रसिद्धिः प्रजायते
अनेन मन्त्रराजेन कृत्वा भस्माभिमन्त्रणम्

तिलकं विन्यसेद्यस्तु तस्य ग्रहभयं हरेत्
त्रिवारं जपमानस्तु दत्तं वार्यभिमन्त्र्य च
प्राशयेद्यो नरो मन्त्रं नृसिंहध्यानमाचरेत्
तस्य रोगाः प्रणश्यन्ति ये च स्युः कुक्षिसम्भवाः

किमत्र बहुनोक्तेन नृसिंहसदृशो भवेत्
मनसा चिन्तितं यत्तु स तच्चाप्नोत्यसंशयम्

गर्जन्तं गर्जयन्तं निजभुजपटलं स्फोटयन्तं हठन्तं
रूप्यन्तं तापयन्तं दिवि भुवि दितिजं क्षेपयन्तं क्षिपन्तम्
क्रन्दन्तं रोषयन्तं दिशि दिशि सततं संहरन्तं भरन्तं
वीक्षन्तं घूर्णयन्तं शरनिकरशतैर्दिव्यसिंहं नमामि

दिव्यसिंहं नमामि, दिव्यसिंहं नमामि

इति श्रीब्रह्माण्डपुराणे प्रह्लादोक्तं
श्रीनृसिंहकवचं सम्पूर्णम्.

*More Lyrics from Hare Krishna*

## English

Narasimha-kavacham vaksye
Prahladenoditam pura
Sarva-raksa-karam punyam
Sarvopadrava-nasanam

Sarva-sampat-karam chaiva
Svarga-moksa-pradayakam
Dhyatva narsimham devesam
Hema-simhasana-sthitam

Vivrtasyam tri-nayanam
Sarad-indu-sama-prabham
Laksmyalingita-vamangam
Vibhutibhir upasritam

Catur-bhujam komalangam
Svarna-kundala-sobhitam
Sriyasu-sobhitoraskam
Ratna-keyura-mudritam

Tapta-kancana-sankasam
Pita-nirmala-vasasam
Indradi-sura-maulistha
Sphuran manikya-diptibhih

Virajita-pada-dvandvam
Sankha-cakradi-hetibhih
Garutmata chavinayat
Stuyamanam mudanvitam

Sva-hrt-kamala-samvasam
Kritva tu kavacham pathet
Narsimho me sirah patu

Loka-raksatma-sambhavah

Sarvago pi stambha-vasah
Palam me raksatu dhvanim
Narsimho me drsau patu
Soma-suryagni-locanah

Smrtim me patu nrharih
Muni-varya-stuti-priyah
Nasam me simha-nasas tu
Mukham laksmi-mukha-priyah

Sarva-vidyadhipah patu
Narsimho rasanam mama
Vaktram patv indu-vadanah
Sada prahlada-vanditah

Narsimhah patu me kantham
Skandhau bhu-bharananta-krt
Divyastra-sobhita-bhujo
Narsimhah patu me bhujau

Karau me deva-varado
Narsimhah patu sarvatah
Hrdayam yogi-sadhyas cha
Nivasam patu me harih

Madhyam patu hiranyaksa
Vaksah-kuksi-vidaranah
Nabhim me patu nrharih
Sva-nabhi-brahma-samstutah

Brahmanda-kotayah katyam
Lyricsbogie.com
Yasyasau patu me katim
Guhyam me patu guhyanam
Mantranam guhya-rupa-dhrk

Uru manobhavah patu
Januni nara-rupa-dhrk
Janghe patu dhara-bhara

Harta yo ’sau nr-kesari

Sura-rajya-pradah patu
Padau me nrharisvarah
Sahasra-sirsa-purusah
Patu me sarvasas tanum

Mahograh purvatah patu
Maha-viragrajo ’gnitah
Maha-visnuh daksine tu
Maha-jvalas tu nairrtau

Pascime patu sarveso
Disi me sarvatomukhah
Narsimhah patu vayavyam
Saumyam bheesana-vigrahah

Isanyam patu bhadro me
Sarva-mangala-dayakah
Samsara-bhayadah patu
Mrtyor mrtyur nr-kesari

Idam narsimha-kavacham
Prahlada-mukha-manditam
Bhaktiman yah pathennityam
Sarva-papaih pramucyate

Idam narsimha-kavacham
Prahlada-mukha-manditam
Bhaktiman yah pathennityam
Sarva-papaih pramucyate

Putravan dhanavan loke
Dirghayur upajayate
Yam yam kamayate kamam
Tam tam prapnoty asamsayam

Putravan dhanavan loke
Dirghayur upajayate
Yam yam kamayate kamam
Tam tam prapnoty asamsayam

Sarvatra jayam apnoti
Sarvatra vijayi bhavet
Bhumy antariksa-divyanam
Grahanam vinivaranam

Vrscikoraga-sambhuta
Visapaharanam param
Brahma-raksasa-yaksanam
Durotsarana-karanam

Bhurje va talapatre
Va kavacham likhitam subham
Kara-mule dhrtam yena
Sidhyeyuh karma-siddhayah

Devasura-manusyesu
Svam svam eva jayam labhet
Eka-sandhyam tri-sandhyam va
Yah pathen niyato narah

Sarva-mangala-mangalyam
Bhuktim muktim cha vindati
Dva-trimsati-sahasrani
Pathechhuddhatmabhir nribhih

Sarva-mangala-mangalyam
Bhuktim muktim cha vindati
Dva-trimsati-sahasrani
Pathechhuddhatmabhir nribhih

Kavachasyasya mantrasya
Mantra-siddhih prajayate
Anena mantra-rajena
Krtva bhasmabhi mantranam

Tilakam bibhriyad yas tu
Tasya graha-bhayam haret
Tri-varam japamanas tu
Dattam varyabhimantrya cha

Prasaye dyam naram mantram

Narsimha-dhyanamacaret
Tasya rogah pranasyanti
Ye cha syuh kuksi-sambhavah

Kimatra bahunoktena
Narsimha sadrso bhavet
Manasa cintitam yattu sa
Tacchapnotya samsayam

Garjantam garjayantam nija-bhuja patalam
Sphotayantam hatantam
Dipyantam tapayantam
Divi bhuvi ditijam ksepayantam ksipantam
Krandantam rosayantam
Disi disi satatam samharantam bharantam
Viksantam ghurnayantam
Kara-nikara-sataih
Divya-simham namami
Divya-simham namami
Divya-simham namami

Iti sri-brahmanda-purane prahladoktam
Sri-narsimha-kavacham sampurnam.

*More Lyrics from [Hare Krishna](https://www.lyricsbogie.com)*